# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा नवम्बर्-दिसम्बर् - २०१६

कक्षा - शास्त्रितृतीयवर्षम् (SEM-V) **प्रश्नपत्रम् - ६** गुणाः - ७०

विषयः - नव्यव्याकरणम् **कोड -** C.C-3.5.10 समयः - ११:०० तः २:००

दिनाङ्कः - ३०.११.२०१६ सन्दर्भग्रन्थः - व्याकरणमहाभाष्यम्, उणादिसूत्राणि च

---

प्रथमान्वितिः (युनिट- १)

प्रश्नः १ निम्नलिखितेषु वार्तिकद्वयं व्याख्येयम् (८)

क. तस्य विवृतोपदेशादन्यत्रापि विवृतोपदेशः सवर्णग्रहणार्थः।

ख. एकाजनेकाज्ग्रहणेषु चावृत्तिसंख्यानात्।

ग. प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न।

प्रश्नः २ अक्षरसमाम्नायिकेन अकारेण सह अन्यत्रापि विवृतोपदेशत्वं गुणदोषपुरःसरं प्रतिपादनीयम् (८)

अथवा

"ञमङणनम्" सूत्रस्य मकारप्रत्याख्यानपरं भाष्यं सविस्तरं विवेचनीयम्

प्रश्नः ३ निम्नलिखितेषु द्वयोरुपरि टिप्पणी लेख्या- (४)

क. आदित्यवत्स्युः।

ख. रूपसामान्याद्वा।

ग. एकदेशविकृतस्यानन्यत्वात्प्लुत्यादयः।

प्रश्नः ४ निम्नलिखितेषु प्रश्नेषु पञ्च प्रश्नाः समाधेयाः- (५)

क. अकारः सवर्णग्रहणेन आकारं कथं न गृह्णाति?

ख. कालभेदः सवर्णसंज्ञायां बाधको भवति न वा?

ग. लोके वेदे च दीर्घप्लुतौ संवृतौ भवतःअथवा विवृतौ?

घ. 'क्लृप्तः' इत्यत्र केन सूत्रेण द्वित्वं क्रियते?

ङ. लोके अर्धस्य एकारस्य अर्धस्य ओकारस्य वा उच्चारणं भवति न वा?

च. 'अट्' प्रत्याहारे हकारग्रहणाय कस्मिन् सूत्रे हकारग्रहणं करणीयम्?

छ. 'रल्' प्रत्याहारे हकारग्रहणाय कस्मिन् सूत्रे हकारग्रहणं करणीयम्?

द्वितीयान्वितिः (युनिट- २)

प्रश्नः ५ निम्नलिखितेषु द्वयोः व्याख्या कार्या- (८)

क. लिङ्गेन वा।

ख. सतो वृद्ध्यादिषु संज्ञाभावात्तदाश्रय इतरेतराश्रयत्वादप्रसिद्धिः।

ग. इग्ग्रहणमात्सन्ध्यक्षरव्यञ्जननिवृत्त्यर्थम्।

प्रश्नः ६ "वृद्धिरादैच्" सूत्रे संज्ञाधिकारप्रयोजनं प्रतिपाद्य तत्प्रत्याख्यानप्रकारः प्रदर्शनीयः।**अथवा** (८)

"इको गुणवृद्धी" सूत्रस्थस्य 'इक्' ग्रहणस्य प्रयोजनं समुत्पाद्य "षष्ठ्याः स्थाने योगत्वादिग्निवृत्तिः" वार्तिकाशयः प्रतिपादनीयः।

प्रश्नः ७ निम्नलिखितेषु द्वयोरुपरि टिप्पणी लेख्या- (४)

क. छन्दोवत्सूत्राणि भवन्ति।

ख. आचार्याचारात्संज्ञासिद्धिः।

ग. पुगन्तलघूपधग्रहणमनन्त्यनियमार्थम्

प्रश्नः ८ निम्नलिखितेषु प्रश्नेषु पञ्चनां प्रश्नानां लघूत्तरं देयम् (५)

क. “वृद्धिरादैच्” सूत्रे संज्ञावाचकं पदंकिम् अस्ति?

ख. भसंज्ञाकारणात् सन्धिकाले“वृद्धिरादैजदेङ् गुणः” इत्यत्र चकारस्य स्थाने जश्त्वं जकारः कथं भवति?

ग. “वृद्धिरादैच्” इत्यत्र भसंज्ञाकारणात् कस्य प्राप्तिर्न भवति?

घ. “वृद्धिरादैच्” सूत्रे भाविताः के सन्ति?

ङ. “इको गुणवृद्धी” सूत्रे'इकः' इत्यत्र का विभक्तिः किं च वचनम्?

च. गुणशब्देन वृद्धिशब्देन वा यत्र गुणवृद्धी विधीयेते तत्र कस्य पदस्य उपस्थितिर्भवति?

छ. “इको गुणवृद्धी” सूत्रे'गुणवृद्धी इति पदे कः समासः?

तृतीयान्वितिः (युनिट- ३)

प्रश्नः ९ निम्नलिखितेषु सूत्रेषु द्वयोः सूत्रयोः सोदाहरणं व्याख्या कार्य- (८)

क. भृमृशीङ्तॄ चरित्सरितनिधनिमिमस्जिभ्य उः

ख. शॄ स्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च

ग. सलिकल्यनिमहिभडिभण्डिशण्डिपिण्डितुण्डिकुकिभूभ्य इलच्

प्रश्नः १० निम्नलिखितेषु चतुर्णांप्रयोगाणां ससूत्रं सिद्धिः कार्य- (८)

वायुः, दारु, किंशारुः, तालुः, सिन्धुः, इषुः, पृथुः, विधुरः।

प्रश्नः ११ निम्नलिखितयोः सूत्रमेकमाश्रित्य टिप्पणी लेख्या- (२)

क. अणश्च।

ख. मसेश्च।

प्रश्नः १२ निम्नलिखितेषु प्रश्नद्वयस्य उत्तरं देयम् (२)

क. 'कारुः' इत्यत्र 'कृ+उ' इत्यवस्थायां केन सूत्रेण वृद्धिर्भवति?

ख. 'चारु' इत्यत्र 'चर्+उ' इत्यवस्थायां केन सूत्रेण उपधावृद्धिर्भवति?

ग. 'मयूरः' इत्यत्र 'ऊरन्' प्रत्ययः केन सूत्रेण भवति?

घ. 'जीवातुः' इत्यत्र 'आतु' प्रत्ययः केन सूत्रेण भवति?

***